International Journal of Sanskrit Research 2022; 8(6): 45-48

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(6): 45-48
© 2022 IJSR
www.anantaajournal.com
Received: 12-10-2022
Accepted: 03-11-2022

**मञ्जुनाथभट्टः**
प्राचार्यः,श्रीमेधादक्षिणामूर्तिवेद भवनसंस्कृतमहाविद्यालयः, गोकर्णम् सहायकप्राध्यापकः, कर्नाटकसंस्कृतविश्वविद्यालयः, बेङ्गळूर्, कर्णाटकराज्यम्, भारतम्

**Corresponding Author:**
**मञ्जुनाथभट्टः**
प्राचार्यः,श्रीमेधादक्षिणामूर्तिवेद भवनसंस्कृतमहाविद्यालयः, गोकर्णम् सहायकप्राध्यापकः, कर्नाटकसंस्कृतविश्वविद्यालयः, बेङ्गळूर्, कर्णाटकराज्यम्, भारतम्

# प्रतिनिधिविमर्शः

**मञ्जुनाथभट्टः**

## प्रस्तावना

वेदार्थनिर्णयार्थमवततार पूर्वमीमांसा 'अथातो धर्मजिज्ञासा'[1] इत्यारभ्य 'अन्वाहार्ये च दर्शनात्'[2] इत्यन्तसूत्रजालेन जैमिनिमुनिप्रणीतेन। तर्हि को नाम धर्मः इत्यनुयोगस्य यागादिरेव धर्मः[3], चोदनालक्षणोऽर्थो धर्मः[4] इत्यादिपदसञ्चयेन निस्ससारोत्तरं मीमांसकमुखपद्मात् । यागादिरूपेण विद्यमानस्य धर्मस्य आचरणं नानायाससाध्यम्। अत एव शङ्करभगवत्पादाः निजनिर्मिते मुण्डकोपनिषद्भाष्ये एवं प्रोचुः- "एष सम्यगाहुतिप्रक्षेपलक्षणः कर्ममार्गो लोकप्राप्तये पन्थास्तस्य सम्यक्करणं दुष्करं विपत्तयस्त्वनेका भवन्ति"[5] इति। नित्यकर्मसु यथाशक्तिन्यायस्य सत्त्वेपि काम्यकर्मसु साङ्गप्रधानानुष्ठानेनैव फलप्राप्तिनियमात् यायजूकस्य द्रव्याद्यभावे का गतिः स्यात् ? यागादीनां द्रव्याद्याकाङ्क्षा कथं वा शान्ता स्यात्? यागभावनायाः इतिकर्तव्यताकाङ्क्षा वा केन प्रकारेण शान्ता स्यादिति न केवलमस्मच्छ्रुतिपथमागतोऽयं विषयः। साक्षात् श्रुतिरेव एतन्मनसि निधाय उवाच-यदि सोमं न विन्देत पूतीकानभिषुणुयात्" इति। अथ च मान्ध्यदिनीये शतपथब्राह्मणेपि जनकयाज्ञवल्क्यसंवादे प्रतिनिधिविचारः प्रतिध्वनितः[6]। द्रव्याद्यभावावस्थायां का व्यवस्थेत्युक्ते प्रतिनिधिरेव शरणीकरणीयः।

## को नाम प्रतिनिधिः?

प्रतिन्युपसर्गपूर्वकात् डु धाञ् धातोः "उपसर्गे घोः किः[7]" इत्यनेन सूत्रेण किप्रत्यये निष्पन्नोयं प्रतिनिधिशब्दः। प्रतिनिधीयते सदृशीक्रियत इति व्युत्पत्त्या अत्र भावप्रधानात्मको निर्देशः। शास्त्रविहितत्वे सति विकल्पप्रयुक्तत्वाभावे सति सदृशतया विहितव्यक्तिकार्यनिर्वर्तकत्वं

---

[1] जै.१.१.१.सू.

[2] जै.सू.१२४.४५.

[3] अर्थसङ्ग्रहः-पृ११.सं.

[4] जै.१.१.२.सू.

[5] मुण्डकोपनिषत्शाङ्करभाष्यम्.१.१.२-

[6] श११.३.१.ब्रा.

[7] पा३.३.९२.सू.

प्रतिनिधित्वम्। शास्त्रविहितत्वमात्रोक्तौ प्रोक्षणादिमन्त्रस्थले अवघातादिमन्त्रेष्वतिव्याप्तिः स्यात्, अवघातस्यापि शास्त्रविहितत्वात्। विहितव्यक्तिकार्यनिर्वर्तकत्वमात्रोक्तौ माषादीनामपि लक्षणसमन्वयः स्यात्, माषादीनां द्रव्यत्वेन कार्यनिर्वहणसामर्थ्यसत्त्वात्। व्रीहिभिर्यजेत यवैर्वा इत्यादिविकल्पस्थले लक्षणसमन्वयः मा भूदिति कृत्वा विकल्पप्रयुक्तत्वाभावे इति दलम्।आक्षेपप्राप्तद्रव्यस्यैव प्रतिनिधित्वेन व्यवहारः ।

**प्रतिनिधिनिर्णयः कथम्?**

शास्त्रविहितद्रव्याद्यभावे यागाद्यनुष्ठानार्थं प्रतिनिधिस्त्वनिवार्य इत्यत्र नास्ति विप्रतिपत्तिलेशः। किन्तु कुत्र किं द्रव्यं प्रतिनिधेयमित्यवश्यं विवेचनीयोंशः। प्रतिनिधिर्न विधिवाक्यविधेयो भवति। उपमानप्रमाणेन सदृशः पदार्थ उपादीयते। एवं च शास्त्रेण विहितद्रव्यं कुत्रचित् सुसदृशं क्वचित् ईषत्सदृशमपि द्रव्यं प्रतिनिधिरूपेण स्वीक्रियते यागादिषु।तदत्र विविच्यते।

द्वादशलक्षण्यां षष्ठाध्याये तृतीयपादे बहुष्वधिकरणेषु प्रतिनिधिविचार उपस्थापितः। तर्हि एतर्हि कुत्र कः प्रतिनिधिरिति विचारणीयोंऽशः।

**विहितद्रव्याभावे प्रतिनिधिः**

देवतोद्देश्येन द्रव्यत्याग एव यागः। दर्शपूर्णमासादौ विहितद्रव्यालाभे सति प्रतिनिधिद्रव्यं ग्राह्यम्। द्रव्यं विना प्रधानस्य निवृत्तिः न जातु सम्भवति। स्वविधेयनिवृत्त्यर्थं यत्किमपि द्रव्यं विधिराक्षिपति। अतः सादृश्यनियमेन नीवारादिद्रव्यं स्वीकृत्य अनुष्ठेयो भवति यागः। तदुक्तं तत्रभवता जयन्तभट्टेन-`अपि च क्वचिद् द्रव्यादावलभ्यमाने प्रतिनिध्युपादानेन कर्मसमापनात् प्रतिनिधिमाग्रोपादाने प्राप्ते व्रीहिसदृशानीवारोपादानमुपमानात् प्रतीयते इति । कुमारिलभट्टा अपि एवमवादिषुः

प्रतिनिधिरपि चैवं व्रीहिसादृश्ययोगात्
भवति तदपचारे यत्र नीवारजातौ।
तदपि फलमभीष्टं लक्षणस्योपमायाः
प्रकृतिरपि च गौणैर्बाध्यते यत्र चान्यैः ॥

एवं शास्त्रविहितद्रव्याभावे सादृश्यद्वारा अन्यत् द्रव्यं प्रतिनिधीयते।

**देवतादीनां प्रतिनिध्यभावः**

देवतोद्देश्येन द्रव्यत्यागस्य यागशब्दवाच्यत्वात् द्रव्यप्रतिनिधिविचारानन्तरं देवतायाः प्रतिनिधिर्वर्तते वा न वेति जिज्ञासा उत्थीयत एव। द्रव्याभाववत् देवताभावस्तु न जातु सम्भावी, शब्दस्यैव देवतात्वस्वीकारात्। उद्देश्यतया एव देवतायाः न यागसाधनत्वं, व्रीहीन् प्रोक्षतीत्यादावपि व्रीह्यादीनामपि तदापत्तिः स्यात्। आग्नेयादियागेषु वह्नय इदं न ममेति त्यागापत्तिः स्यात्। आग्नेयं, सौर्यमित्यादिना साक्षात् विधिना शब्दत एव देवताविधानात् देवतायाः न प्रतिनिधिः। किञ्च यागस्य देवतापेक्षायां सत्यामपि विधेयत्वघटिततद्विषये आक्षेपकत्वस्यासम्भवात् देवताविधानं त्वपूर्वविधिनैव। एवं देवतायाः न प्रतिनिधिः। अत्रास्ति कश्चिद्विशेषः-कामं तं देवताया इति कातीयसूत्रानुसारेण शाखान्तरे प्रजापतिः देवताप्रतिनिधौ, होममन्त्रप्रतिनिधौ तु व्याहृतय इति। अभिप्रायमिमं मनसि निधाय आचार्यः खण्डदेव एवमवादीत् निजनिर्मितभाट्टदीपिकायाम्- "तदसम्भवे च यागपदार्थस्य लोप एव यदा तु देवतापचारे प्रजापतिरिति वचनम् अभावे विधिविधया प्रामाणिकं यदा तथैवानुष्ठेयम् " इति। एवमेव आवहनीयाद्यग्नीनामपि न प्रतिनिधिः। केवलं ज्वलनमात्रेणैव न तेषां अग्निव्यवहारः। किन्तु आधानविधिसिद्धत्वात् तत्तत्संस्कारवशादेव तत्तन्नामसिद्धिः। अतः अग्नीनां न प्रतिनिधिः। शब्दक्रियाशब्देनात्र मन्त्रोच्चारणं विवक्षितम्। यस्मिन् कर्मणि यो मन्त्रः निर्दिष्टः स एव मन्त्रस्तत्र विनियोक्तव्यः नान्यः नियमजन्यादृष्टप्रयोजनानापत्तेः।

**हिरण्यकेशिसूत्रेपि-**

न स्वामित्वस्य भार्यायाः पुत्रस्य देशस्य कालस्य अग्नेः देवतायाः कर्मणः शब्दस्य च प्रतिनिधिर्विधीयते।
न स्यात्प्रतिनिधिर्मन्त्रस्वामिदेवाग्निकर्मसु।

एवं "न देवताग्निक्रियमन्यार्थसंयोगात्" इत्यनेन सूत्रेण देवतादीनां न प्रतिनिधिरिति जैमिनिना मुनिना प्रतिपादितम्।

**प्रतिषिद्धं द्रव्यं न प्रतिनिधेयम्**

तत्रभवान्जैमिनिः "प्रतिषिद्धं चाविशेषेण हि तच्छ्रुतिः" सूत्रेण यज्ञे उपयोक्तुमनर्हाणि माषादिद्रव्याणि निषेधति। यज्ञाङ्गत्वमात्रपुरस्कारेण माषादीनां यज्ञसम्बन्धप्रतिषेधः। यद्यपि मुद्गसादृश्याद् माषादिद्रव्याणां प्राप्तावपि तन्निषेधः "अयज्ञिया वै माषा वरकाः कोद्रवा" इति । तत्रभवान्कात्यायनोऽपि-

अतोऽन्यदपि सङ्ग्राह्यं सदृशं धान्यमात्रकम्।
न ग्राह्यं सर्वथा माषवरकादारकोद्रवम् ॥
नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित्॥ इति

स्वाभिप्रायं प्रकटीचकार।

प्रतिषेधात्।अतः प्रतिनिधिनिर्णये शास्त्र सम्मति रप्यपेक्षिते त्यवगन्तव्यम्।

**अग्निहोत्रादौ यजमानप्रतिनिध्यभावः**

देवतोद्देश्येन द्रव्यत्यागात्मके कर्मणि यजमान एव स्वामी भवेत्। शास्त्रफलं प्रयोक्तरि इति न्यायः। अग्निहोत्रादिकर्मजन्यं फलं यजमानस्यैव भवति। ननु यजमानाभावे यजमानपत्नी एव द्रव्यत्यागं करोतु इत्युक्ते पत्या सह एव तस्याः अधिकारः साधितः। यजमाने प्रोषिते आचारः अन्यः वर्तते।

सन्निधौ यजमानस्स्यादुद्देश्यत्यागकारकः।
असन्निधौ पत्नी स्यादध्वर्युर्वा तदाज्ञया॥

तत्र बोधायनवचनमपि एवं-यद्यस्य पुत्रो वा अन्तेवासी वाऽलांकर्मीणः तं तत्र प्रेष्येत्" इति।एवं च यजमाने प्रोषिते पत्नी वा आहोस्वित् अध्वर्युर्वा शिष्यो वा कर्म कर्तुं शक्नोतीत्यवगतम्। मृते यजमाने सति पत्न्याः अग्न्यभावात् अनधिकारः। मृतायां पत्न्यां यजमानस्यापि नाधिकारः।ननु 'सीतां हित्वा दशमुखरिपुर्नोपयेमे यदन्यां तस्या एव प्रतिकृतिसखो यत्क्रतूनाजहार "इति कालिदासोक्तं कथं सङ्गच्छते' इति चेत् शास्त्रे तादृशस्थले उपाधिशब्देन व्यवहारदर्शनात्। अत एवोक्तम्-

मृतायामपि भार्यायां वैदिकाग्निं न हि त्यजेत्।
उपाधिनापि तत्कर्म यावज्जीवं समाचरेत्॥
अन्ये कुशमयीं पत्नीं कृत्वा तु गृहमेधिनः।
अग्निहोत्रमुपासन्ते यावज्जीवमनुव्रताः॥ इति।

यजमानो वा पत्नी म्रियते चेत् का गतिः स्यादित्यस्य उत्तरं टुप्टीकायामेवं प्रदर्शितम्-"मृते तु यजमाने नैव प्रतिनिध्याशङ्कास्ति, प्रतिनिधातुरसम्भवात्।पत्नीति चेन्न, तस्याः पतिहीनाया अग्न्यभावेन अधिकाराभावात्" इति। एवं च अग्निहोत्रादौ यजमानस्य प्रतिनिधिर्नास्त्येवेति मीमांसकमर्यादा।

**सत्रे यजमानापचारे प्रतिनिधिः**

बहूनां तु प्रवृत्ते अन्यमागमयेदवैगुण्यात् इत्यनेन सूत्रेण सत्रे प्रतिनिधरस्तीति प्रतिपादितः। "सप्तदशावराः सत्रमासीरन्", "ऋद्धिकामाः सत्रमासीरन्" इत्यादिवाक्यैः सत्रं विहितम्। ये यजमानास्त ऋत्विज इति नियमस्सत्रे। बहुदिनसाध्ये सत्रे कस्यचित् यजमानस्य मरणे सति अन्यः प्रतिनिधातव्यो व न वेति संशय्य तत्र सर्वाङ्गोपसंहारार्थं कश्चनावश्यं प्रतिनिधातव्य इति मीमांसकैः सिद्धान्त उपस्थापितः। प्रतिनिध्यभावे अङ्गवैगुण्ये अन्येषामपि फलं न स्यात्। अतः सत्रे यजमानस्य प्रतिनिधिः युक्तियुक्तः। " यदि सत्राय सन्दीक्षितानां प्रमीयेत योऽस्य नेदिष्ठः तं तत्स्थाने दीक्षयित्वा तेन सह यजेरन्" इत्यत्र नेदिष्ठस्य ग्रहणं कर्तव्यमिति तात्पर्यम्। अत्र सर्वाङ्गानुष्ठाने प्रतिनिधेः कार्याभावात् प्रतिनिधेः न फलम्। किन्तु 'तस्मिंश्च फलदर्शनात्' इत्यनेन सूत्रेण मृतस्य यजमानस्यैव।प्रतिनिधीयमानस्यापि ब्रह्मचर्यपयोव्रतादयः फलिसंस्काराः भवन्तीति मीमांसकसिद्धान्तः।

**प्रतिनिध्यपचारे का व्यवस्था?**

तत्तत्कर्मानुष्ठाने विहितद्रव्यालाभे प्रतिनिधिरुपादेय इत्यभ्युपगतम्। प्रतिनिधिग्रहणे तु सादृश्यनियमः परिपाल्यते इति स्थितम्। तत्र यः प्रतिनिधीयते सः मुख्यद्रव्यसदृशो वा विसदृशो वा सुसदृशो वा इत्येवंरूपेण विचिकित्सा तु सम्भवत्येव। द्रव्यं यागनिर्वर्तकरूपेण दृष्टप्रयोजनवत्। तद्विधायकशास्त्रस्य नियमविधित्वेन व्यवहारः दृष्टचरः। अतः सुसदृशमेव द्रव्यं प्रतिनिधित्वेन गृह्यते चेत् मुख्यशास्त्रस्य अनुग्रहः भवति । अतः सुसदृश एव ग्राह्यः। सुसदृशद्रव्यस्यापचारे ईषत्सदृशद्रव्यं स्वीकृत्य यागोऽनुष्ठेयः न तु वैकल्पिकद्रव्येण । अत एव प्रतिनिधिलक्षणे विकल्पप्रयुक्तत्वाभावे इति दलनिवेशः। प्रतिनिधित्वेन गृहीतस्य केनापि कारणेन नाशे तदानीं मुख्यसदृशद्रव्यमेव उपादेयं भवति। यथा व्रीहिस्थाने प्रतिनिधिभूतं नीवारद्रव्यं विनष्टं चेत् तदानीं व्रिहिद्रव्यसदृशद्रव्यमेवोपादेयं न तु नीवारसदृशं द्रव्यं ग्राह्यम्। एवञ्च सोमाभावे पूतीकानभिषुणुयादिति वाक्येन सोमस्थाने विहितस्य पूतीकस्याप्यपचारे सोमसदृशस्यैव द्रव्यस्य ग्रहणम्। एवं च प्रतिनिध्यपचारे कथमनुष्ठानं इत्येतत्सर्वं प्रतिपाद्य प्रतिनिधिसङ्कल्पानन्तरं मुख्यद्रव्यलाभे प्रतिनिधिभूतद्रव्येण अनुष्ठानं वा मुख्यद्रव्येणानुष्ठानं वा इत्यपि चिन्तितम्। वस्तुतस्तु मुख्यद्रव्यालाभे प्रतिनिधिद्रव्यं स्वीकृत्य कर्म कर्तुं प्रवृत्तः यजमानः पुनः मुख्यद्रव्यसम्पादनार्थं नैव प्रयतते साम्प्रतिके काले इति मन्मतिः। क्रत्वनुष्ठानार्थं यदि प्रतिनिधिः संस्कृतो भवति तदानीं मुख्यद्रव्यलाभेऽपि प्रतिनिधेर्ग्रहणमित्यपि सिद्धान्तितम्। द्रव्यसंस्कारविरोधे कथं निर्णय इत्यपि प्रदर्शितं द्रव्यसंस्कारविरोधाधिकरणे। इत्थञ्च षष्ठाध्याये तृतीयपादः प्रतिनधिनिरूपणपरः इत्यत्र नास्ति विप्रतिपत्तिः।

**उपसंहारः**

यज्ञकर्मणि द्रव्याद्यभावे किं प्रतिनिधेयं? कस्य प्रतिनिधिः कः भवितुमर्हति? प्रतिनिधिनिर्णये के नियमाः? अथ च कस्य प्रतिनिधिः नास्ति इत्यादिरूपेण अधिकाराध्याये षष्ठाध्याये

युक्तियुक्तमुपपादितम्। न केवलमयं श्रौतकर्मणि उपकारकः किन्तु स्मार्तकर्मस्वपि प्रतिनिधिविचारः अत्यन्तं महत्वपूर्णं स्थानं भजते इत्यलं पल्लवितेन।

## संधर्व सूची


1. अध्वरमीमांसाकुतूहलवृत्तिः- वासुदेवदीक्षितविरचिता, पट्टाभिरामशास्त्रिणा सम्पादिता, नवदेहलीस्थश्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठेन प्राकाश्यं नीता। १९७४
2. अर्थसङ्ग्रहः- लौगाक्षिभास्करप्रणीतः, पण्डितराजपटाभिरामशास्त्रिकृतार्थालोकव्याख्यासहितः डा वाचस्पति उपाध्यायकृत 'अर्थालोकलोचनहिन्दीव्याख्यासहितः, वाराणसीस्थचौखम्बा ओरियन्टालियाद्वारा प्राकाश्यं नीतः। १९७७
3. नयमञ्जरी-जयन्तभट्टप्रणीता । महामहोपाध्यायगङ्गाधरशास्त्रिभिः परिष्कृता। इ.जे लेजोरस् आण्ड् कम्पनि बनारस् द्वारा मुद्रिता प्राकाश्यं नीता। १८९५
4. निर्णयसिन्धुः- कमलाकरभट्टविरचितः कृष्णंभट्टकृतव्याख्यासहितः वाराणसीस्थविद्याविलासप्रकशनद्वारा प्रकाशितः १९१९
5. भाट्टदीपिका-आचार्यखण्डदेवविरचिता- श्रीशम्भुभट्टविरचितप्रभावलीसंवलिता। सुब्रह्मण्यशास्त्रिवर्येण सम्पादिता। मद्रपुरीयविश्वविद्यालयेन प्राकाश्यं नीता। १९५२
6. भाट्टभाषाप्रकाशः-श्रीमन्नारायणविरचितः महामहोपाध्यायश्रीलक्ष्मीनारायणमूर्तिप्रणीतबालप्रिया व्याख्यासहितः।तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठद्वारा प्राकाश्यं नीतः-२००५
7. मीमांसानयमञ्जरी" परिशिष्टसहिता, प्रणेता संपादकश्च- पण्डितश्रीपट्टाभिरामशास्त्री प्रकाशकः- डा.हरिश्चन्द्रमणित्रिपाठी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९८४ |
8. मीमांसान्यायप्रकाशःआपदेवकृतः, अभ्यंकरोपाह्ववासुदेवशास्त्रिविरचितया प्रभाख्यया व्याख्यया समेतः। प्राच्यविद्यासंशोधनमन्दिराधिकृतैः भाण्डारकरप्राच्यविद्यामन्दिरमुद्रणालये मुद्रयित्वा प्राकाश्यं नीतः। १९३७
9. मीमांसाकोषः-केवलानन्दसरस्वतीपरिष्कृतः। सतारस्थप्रज्ञापाठशालामण्डलद्वारा प्रकाशितः।
10. मीमांसाश्लोकवार्त्तिकम्- कुमारिलभट्टविरचितम् हिन्दीव्याख्यासहितम्, व्याख्याता-दुर्गाधर झा, कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालयद्वारा प्रकाशितम्। १९७९
11. मुण्डकोपनिषत्-सटीकशाङ्करभाष्योपेता नारायणविरचितमुण्डकोपनिषद्दीपिकासहिता। आनन्दाश्रमस्थपण्डितैः संशोधिता। महादेव चिमणाजी आपटे इत्यनेन पुण्याख्यपत्तने प्राकाश्यं नीता। शालिवाहनशकाब्दाः-१८१०
12. रघुवंशम्-महाकविकालिदासविरचितम्। मल्लिनाथकृतसञ्जीविनीसहितम्। काशीनाथपाण्डुरङ्गपरव इत्यनेन पाठान्तरैः संयोज्य संशोधितम्। मुम्बय्यां निर्णयसागरयन्त्रालयाधिपतिना मुद्रितम्। शकवत्सरः १८०८